न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्।
द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यत्तस्य दुष्कृतं नास्ति पूर्व्वतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्र्यध्यानपूतस्य कला नार्हन्ति षोड़शीम्।
एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम्॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः॥
तस्य देहापवित्रत्वं यथा,—
"यथा देहापवित्रत्वं विप्रादीनां यतो भवेत्।
देवर्षे! शृणु तत्सर्व्वं नराणामानुपूर्व्विकम्॥
जातके मृतकेऽस्नाते जलौकाभिः क्षते तथा।
अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्म्मसु॥
अपूततनुरुत्सर्गे नरो मूत्रपुरीषयोः।
अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु॥
रक्तपाते नखश्रृङ्गदन्तखड्गादिभिः क्षते।
विप्रादेरशुचिः कायः शस्त्राद्यैः कण्टकादिभिः॥
भुक्तहस्तानभोच्छिष्टेऽपवित्रः कृतमैथुने।
शयने ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि॥
ज्वरादिभिश्चतुःषष्टिरोगैर्युक्ते द्विजन्मनाम्।
वपुरप्रयतं पूजादानहोमजपादिषु॥
धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः।
तथा च रेतःस्खलने मर्त्यदेहापवित्रता॥
अपवित्रं द्विजातीनां वपुः स्याद्राहुदर्शने।
गर्हितदानग्रहणे पतिते पातकादिभिः॥
अशौचान्तेन शुद्धिः स्याज्जातके मृतके द्विज!॥
सर्व्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्म्मसु॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः॥
अथ श्राद्धीयब्राह्मणनिर्णयः।
मान्धातोवाच।
"कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं महामुने!।
द्विजेभ्यः किं गुणिभ्यो वा तन्मे व्याख्यातुमर्हसि।
नारद उवाच।
ब्राह्मणान्न परीक्षेरन्नन्यवर्णाश्रयो नृप!।
दैवे कर्म्मणि पित्र्ये च न्याय्यमाहुः परीक्षणम्॥
देवताः पूजयन्तीह दैवेनैव हि तेजसा।
उपेये तस्माद्भावेभ्यः सर्व्वेभ्यो दापयेन्नरः॥
श्राद्धे त्वथ महाराज! परीक्षेद्ब्राह्मणं बुधः।
कुलशीलवयोरूपैर्विद्ययाभिजनेन च॥
तेषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः।
अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तान् शृणु॥"
अपाङ्क्तेया यथा,—
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी।
सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः॥
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति॥
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च॥
श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च।
परिवित्तिस्तु यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति।
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः॥
रक्षांसि गच्छते हव्यं यदेभ्यस्तु प्रदीयते।
श्राद्धे भुक्त्वा महाराज! दुश्चर्म्मा गुरुतल्पगः॥
श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते।
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप!॥
भिषजे शोणितसमं नष्टं देवलके तथा।
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्॥
वहुवाणिजके दत्तं नेह नामुत्र तद्भवेत्।
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे॥
ये तु धर्म्मव्यपेतेषु चरित्रापगतेषु च।
हव्यं कव्यं प्रयच्छन्ति तेषां तन्नाय नश्यति॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्॥
एतान् विद्धि महाबाहो! अपाङ्क्तेयान् द्विजाधमान्।
शूद्राणामुपदेशन्तु ये कुर्व्वन्त्यल्पबुद्धयः॥
षष्टिं काणः शतं षण्डः श्वित्री यावत् प्रपश्यति।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप!॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
असूयता च यद्दत्तं यच्च श्रद्धाविवर्ज्जितम्।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन।
तस्मात् परिवृते दद्यात्तिलांश्चान्वे विकीरयेत्॥
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः॥
अपाङ्क्तेयो यतः पङ्क्त्यां भुञ्जानो ननु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य बालिशम्॥"
पङ्क्तिपावना यथा,—
"इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः।
विद्यावेदव्रतस्नाताः ब्राह्मणाः सर्व्व एव हि॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः।
मखेषु च समस्तेषु भवन्त्यवभृतप्लुताः॥
अक्रोधना अचपलाः क्षान्ता दान्ता जितेन्द्रियाः।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत्॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविदः केचिद् ये च व्याकरणे रताः॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः॥
अङ्गुलिगुरुपाध्यायः स वेदपावनं भजेत्।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम्॥
अथ वेदविद् सर्व्वैः पङ्क्तिदोषैर्विवर्ज्जितः।
न च स्यात् पतितो राजन्! पङ्क्तिपावन उच्यते॥
तस्मात् सर्व्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान्।
स्वकर्म्मनिरतान् शान्तान् कुले जातान् बहुश्रुतान्॥
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च।
न प्रीणाति पितॄन् देवान् स्वर्गञ्च न स गच्छति॥
ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति।
तस्मिन् श्राद्धं न दातव्यं न हि भस्मनि हूयते॥
अमीषां समये विप्रं ये चरन्ति महीपते!।
निश्चिताः सर्व्वधर्म्मशास्त्रान् देवा ब्राह्मणान् विदुः॥
स्वाध्यायनिष्ठानिरता ज्ञाननिष्ठास्तथैव च।
तपोनिष्ठाश्च बोद्धव्याः कर्म्मनिष्ठाश्च पार्थिव!॥
कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भूमिप!।
तत्र ये ब्राह्मणान् केचिन्न निन्दन्ति हि ते नराः॥
ये तु निन्दन्ति जल्पेषु न तान् श्राद्धेषु भोजयेत्।
ब्राह्मणा निन्दिता राजन्! हन्युस्तं पुरुषं नरा॥
वैखानसानां वचनमृषीणां श्रूयते नृप!।
दूरादेव निरीक्षेत ब्राह्मणान् वेदपारगान्॥
प्रियो वा यदि वा द्वेष्यस्तेषां न श्राद्धमाचरेत्॥"
इति पाद्मे स्वर्गखण्डे श्राद्धपात्रनिर्णयो नाम २५ अध्यायः॥ आततायिब्राह्मणवधे दोषाभावो यथा,—
"आत्मानं हन्तुमायान्तमपि वेदान्तपारगम्।
न दोषो हनने तस्य न तेन ब्रह्महा भवेत्॥
प्रायश्चित्तं हिंसकानां न वेदेषु निरूपितम्।
वधे समुचिते तेषामित्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २५ अध्यायः॥
(क्ली, मन्त्रेतरवेदभागः। आशङ्कोपन्यास तन्निरसनपूर्व्वकं तल्लक्षणमाह ऋग्वेदभाष्योपद्घातप्रकरणे यथा। "तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्। पूर्व्वोक्तमन्त्रभाग एकः। भागान्तराणि च कानिचित् पूर्व्वैरुदाहृत्य संगृहीतानि।
"हेतुर्निर्व्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥" इति।
तेन ह्यन्नं क्रियते इति हेतुः १। तद्दध्नो दधित्वमिति निर्व्वचनम् २। अमेध्या वै माषाः इति निन्दा ३ वायुर्वै क्षेपिष्ठा देवतेति प्रशंसा ४। तद्व्यचिकित्स जुहवानी मा हौषामिति संशयः ५। यजमानेन सम्मितौदुम्बरी भवतीति विधिः ६। माषानेव मह्यं पचन्तीति परकृतिः ७ पुरा ब्राह्मणा अभैषुरिति पुराकल्पः ८। यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपाला-